एतच्च धान्यादेर्माने । सुवर्णादिमाने तु सुश्रुतः । "द्वादश धान्यमाषाः मध्यमाष्टसुवर्णमाषकः ते षोड़श सुवर्णम् । अथ मध्यमनिष्पावा एकोनविंशतिर्द्धरणं तान्यर्द्धतृतीयानि कर्षं ततश्चोर्द्धं चतुर्गुणमभिवर्द्धयन्तः पलकुड़वप्रस्थाढकद्रोणा इत्यभिनिष्पद्यन्ते इत्युक्ते २५६ पलमाने च । अर्द्धर्चादिपाठात् कोपधादन्तत्वेऽपि अस्य पु०न०लिङ्गता । अस्य परिमाणवाचकत्वात् आढ़कोव्रीहिरित्यादौ प्रथमायाः परिमाणमर्थः आढ़कपरिमाणपरिच्छेद्योव्रीहिरित्यादि बोधः । आढकं सम्भवति अवहरति पचति वा ख टञ् वा । आढ़कीनः आढ़किकः आढ़कमितधान्यस्यापने तद्वहारके च पात्रे तत्पाचके सूदादौ त्रि० ठञि स्त्रियां ङीप् इति भेदः ।

**आढकजम्बु** पु० आढकमिता जाम्बूर्यत्र देशे । स्थूलजम्बुयुक्तदेशे तत्र भवः वृद्धात्प्राचाम् ठञ् छस्यापवादकः । आढकजम्बुकः । तत्र भवे त्रि० ।

**आढकी** स्त्री आढौकते अच् पृषो०गौ० ङीष् । (अरहर) इति ख्याते शमीधान्यभेदे । "आढकी तुवरी रूक्षा मधुरा शीतला लघुः ग्राहिणी वातजननी वर्ण्या पित्तकफास्रजित्" भावप्र० फले अस्य पुस्त्वमपि "आढकांश्च मसूरांश्च कोद्रवान् लवणं त्यजेत्" काशी०ख० वैश्वदेवे वर्जने ।

**आढ्य** त्रि० आ+ध्यै—क पृषो० । १युक्ते, २विशिष्टे ३सम्पन्ने ४धनिनि च । युक्ते धनाढ्यः पुण्याढ्यः विनयाढ्यः । सम्पन्नः सम्पद्युक्तः "आढ्यास्तथाऽव्यसनिनः स्वगुरक्ताश्च सर्व्वदा" भा०स०प० ५अ० । "आढ्योद्दयति इत्योधर्म्ममतिक्रामति धर्ममतिक्रामन् पापं करोतीति नीलकण्ठधृता श्रुतिः "वेत्तुःपञ्चभिराढ्यानाम्" स्मृतिः "आढ्यादिव प्रापणिकादजस्रम्" माघः ।

**आढ्यकुलीन** पुंस्त्री आढ्यकुले भवः खः । आढ्यकुलभवे ।

**आढ्यङ्करण** न० अनाढ्यमाढ्यं करोत्यनेन आढ्य+कृ-करणे ख्युन् मुम् उप०स० । अभूताढ्यस्य आढ्यताकरणे ।

**आढ्यचर** त्रि० भूतपूर्व्व आढ्यः चरट् । भूतपूर्व्वाढ्ये स्त्रियां ङीप् ।

**आढ्यतम** त्रि० अतिशयेन आढ्यः तमप् । अतिशयाढ्ये ।

**आढ्यपदि** अव्य० आढ्यं पदं प्रहरणं यत्र द्विदण्ड्या० इच् इजन्तत्वादव्ययत्वम् । आढ्यपदप्रहरणयुक्ते युद्धे ।

**आढ्यम्भवन** न० अनाढ्य आढ्योभवत्यनेन आढ्य+भू-करणे ख्युन् मुम् उप०स० । अनाढ्यस्य आढ्यभवनसाधने ।

**आढ्यम्भविष्णु** त्रि०अनाढ्य आढ्यो भवति आढ्य+भू-खिष्णुच् मुम् उप०स० । अभूतपूर्व्वाढ्ये आढ्यताम् प्राप्ते "आढ्यम्भविष्णुर्यशसा कुमारः" भट्टिः ।

**आढ्यम्भावुक** त्रि० अनाढ्य आढ्योभवति आढ्य+भू-खुकञ् मुम् उप०स० । अनाढ्ये आढ्यतया भूते ।

**आढ्यवात** पु० आढ्योवातोयत्र । "कफमेदोवृतो वायुर्यदोरू प्रतिपद्यते । तदाङ्गमर्द्दशैथिल्यरोमहर्षरुजाज्वरैः निद्रया चार्द्दितौ स्तब्धौ शीतलावप्रचेतनौ । गुरुकावस्थिरावूरू न स्वाविव च मन्यते । तमूरुस्तम्भमित्याहुराढ्यवातमथापरे" सुश्रुतोक्तलक्षणे ऊरुस्तम्भरोगे ।

**आणक** त्रि०अणक एव स्वार्थे अण् । १अधमे कुत्सिते सुकृटः ॥ "आणकं सुरतं नाम दम्पत्योः पार्श्वसंस्थयोः" इत्युक्तलक्षणे २सुरतभेदे न० ।

**आणव** न० अणोर्भावः पृथ्वादि० वा अण् । अणुत्वे ।

**आणवीन** त्रि० अणुधान्यानां शर्षपादीनां भवनं क्षेत्रम् वा खञ् । (सुनाडाङ्गा) क्षेत्रभेदे यत्र शर्षपाद्यणुधान्यान्युत्पद्यन्ते तस्मिन् । पक्षे यत् अणव्यमप्यत्र ।

**आणि** पुंस्त्री०अण—इण् स्त्रियां वा ङीप् । रथचक्राग्रस्थे १कीलके, २कोटौ ३सीम्नि च । "मयोभुवा सरथा यातमर्वागन्तं निधिं धुरमाणिर्न नाभिम्" ऋ० ४,४३,८ । "आणिं न रथ्यममृताधितस्थुः" ऋ०१,३५,६, सुश्रुतोक्ते मर्म्मस्थानभेदे, अत ऊर्द्धं प्रत्येकशोमर्म्मस्थानं व्याख्यास्यामः" इत्युपक्रम्य । "जानुन ऊर्द्ध मुभयतस्त्र्यङ्गुलमाणिर्नाम तत्रशोफाभिवृद्धिः स्तब्धसक्थिता च" उक्तम् ।

**आणीवेय** पुंस्त्री० अणिरस्त्यस्य वा दीर्घः अणीवः ऋषिभेद स्तस्यापत्यम् शुभ्रा० ढक् । अणीवर्षेरपत्ये ।

**आण्ड** त्रि० अण्डेभवः अण् । १अण्डसम्भवे पक्षिप्रभृतौ स्त्रियां ङीप् वेदेतु क्वचित् टाप् । "आण्डेव भित्त्वा शकुनस्य गर्भम्" ऋ०१,६८,७, २अण्डजाते हिरण्यगर्भे पु० "तदण्डमभवद्धैमं सहस्रांशुसमप्रभम् । तस्मिन् जज्ञे स्वयं ब्रह्मा सर्व्वलोकपितामहः" इति मनूक्तेस्तस्याण्डजातत्वात् तथात्वम् । "विराड्वह्वैमावाण्डौ स्वराट् च" शत०ब्रा० । अण्डमेव स्वार्थे अण् । ३पुरुषवृषणे स्वार्थिकप्रत्ययस्य क्वचित् लिङ्गवचनातिक्रमस्येष्टत्वात् पु० "यस्य ह्याण्डौ भवतः रेतः सिञ्चति" शत०ब्रा० । "आनन्दनन्दावाण्डौ मे" यजु० २०,९, "आण्डौ वृषणौ" वेददी० । "अण्डं वृषणोऽस्त्यस्य अण् । ४वृषणयुक्ते "आण्डौ वै रेतःसिचौ" शत०ब्रा० । अण्डेन निर्वृत्तः अण् । अण्डनिर्वृत्ते ५कपालरूपे द्युलोके भूलोके च । "तस्मिन्नण्डे स भगवानुषित्वा परिवत्सरम्